श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः
श्रीगुरुपवनपुराधीशाय श्रीकृष्णाय परब्रह्मणे नमः

श्री मेल्पत्तूर् नारायणभट्टतिरेः कृतिषु

# ॥ श्रीमन्नारायणीये एकविंशं दशकम् ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

**श्री रङ्गरामानुज महादेशिकन्**

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्रीमन्नारायणीये एकविंशं दशकम् ॥

## जम्बूद्वीपादिषु भगवदुपासनाप्रकारवर्णनम्

मध्योद्भवे भुव इलावृतनाम्नि वर्षे
गौरीप्रधानवनिताजनमात्रभाजि।
शर्वेण मन्त्रनुतिभिः समुपास्यमानं
सङ्कर्षणात्मकमधीश्वर संश्रये त्वाम् ॥ 21.1 ॥

भद्राश्वनामक इलावृतपूर्ववर्षे
भद्रश्रवोभिर्ऋषिभिः परिणूयमानम्।
कल्पान्तगूढनिगमोद्धरणप्रवीणं
ध्यायामि देव हयशीर्षतनुं भवन्तम् ॥ 21.2 ॥

ध्यायामि दक्षिणगते हरिवर्षवर्षे
प्रह्लादमुख्यपुरुषैः परिषेव्यमाणम्।
उत्तुङ्गशान्तधवलाकृतिमेकशुद्ध -
ज्ञानप्रदं नरहरिं भगवन् भवन्तम् ॥ 21.3 ॥

वर्षे प्रतीचि ललितात्मनि केतुमाले
लीलाविशेषललितस्मितशोभनाङ्गम्।
लक्ष्म्या प्रजापतिसुतैश्च निषेव्यमाणं
तस्याः प्रियाय धृतकामतनुं भजे त्वाम् ॥ 21.4 ॥

रम्ये ह्युदीचि खलु रम्यकनाम्नि वर्षे
तद्वर्षनाथमनुवर्यसपर्यमाणम्।

भक्तैकवत्सलममत्सरहृत्सु भान्तं
मत्स्याकृतिं भुवननाथ भजे भवन्तम् ॥ **21.5** ॥

वर्षं हिरण्मयसमाह्वयमौत्तराह -
मासीनमद्रि धृतिकर्मठकामठाङ्गम् ।
संसेवते पितृगणप्रवरोऽर्यमा यं
तं त्वां भजामि भगवन् परचिन्मयात्मन् ॥ **21.6** ॥

किञ्चोत्तरेषु कुरुषु प्रियया धरण्या
संसेवितो महितमन्त्रनुतिप्रभेदैः ।
दंष्ट्राग्रघृष्टघनपृष्ठगरिष्ठवर्ष्मा
त्वं पाहि विज्ञनुत यज्ञवराहमूर्ते ॥ **21.7** ॥

याम्यां दिशं भजति किम्पुरुषाख्यवर्षे
संसेवितो हनुमता दृढभक्तिभाजा ।
सीताभिरामपरमाद्भुतरूपशाली
रामात्मकः परिलसन् परिपाहि विष्णो ॥ **21.8** ॥

श्रीनारदेन सह भारतखण्डमुख्यै -
स्त्वं साङ्ख्ययोगनुतिभिः समुपास्यमानः ।
आकल्पकालमिह साधुजनाभिरक्षी
नारायणो नरसखः परिपाहि भूमन् ॥ **21.9** ॥

प्लाक्षेऽर्करूपमयि शाल्मल इन्दुरूपं
द्वीपे भजन्ति कुशनामनि वह्निरूपम् ।
क्रौञ्चेऽम्बुरूपमथ वायुमयं च शाके
त्वां ब्रह्मरूपमयि पुष्करनाम्नि लोकाः ॥ **21.10** ॥

सर्वैर्ध्रुवादिभिरुडुप्रकरैर्ग्रहैश्च
पुच्छादिकेष्ववयवेष्वभिकल्प्यमानैः ।

त्वं शिंशुमारवपुषा महतामुपास्यः
सन्ध्यासु रुन्धि नरकं मम सिन्धुशायिन्॥ **21.11** ॥

पातालमूलभुवि शेषतनुं भवन्तं
लोलैककुण्डलविराजिसहस्रशीर्षम्।
नीलाम्बरं धृतहलं भुजगाङ्गनाभि -
र्जुष्टं भजे हर गदान् गुरुगेहनाथ॥ **21.12** ॥

॥ इति श्रीमन्नारायणीये एकविंशं दशकं समाप्तम्॥